भौमानामपि तीर्थानां पुण्यत्वे कारणं शृणु । यथा शरीरस्योद्देशाः केचिन्मेध्यतमाः स्मृताः । तथा पृथिव्यामुद्देशाः केचित् पुण्यतमाः स्मृताः । प्रभावादद्भुताद्भूमेः सलिलस्य च तेजसा । परिग्रहान्मुनीनाञ्च तीर्थानां पुण्यता स्मृता । तस्माद्भौमेषु तीर्थेषु मानसेषु च नित्यशः । उभयेष्वपि यः स्नाति स याति परमां गतिम्” तीर्थभेदा ब्रह्मपुराणे उक्ता यथा

मुनय ऊचुः । “पृथिव्यां यानि तीर्थानि वनान्यायतनानि च । वक्तुमर्हसि धर्म्मज्ञ ! श्रोतुं नो वर्त्तते मनः । रोमहर्षण उवाच । यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् । विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते । मनो विशुद्धं पुरुषस्य तीर्थं वाचांयमस्त्विन्द्रियनिग्रहस्तपः । एतानि तीर्थानि शरीरजानि स्वर्गस्य मार्गं प्रतिबोधयन्ति । चित्तमन्तर्गतं दुष्टं तीर्थस्नानं न शुध्यति । शतशोऽथ जलैर्धौतं सुराभाण्डमिवाशुचि । न तीर्थानि न दानानि न व्रतानि न चाश्रमाः । दुष्टाशयं दम्भरुचिं पुनन्ति व्यथितेन्द्रियम् । इन्द्रियाणि वशे कृत्वा यत्र तत्र वसेन्नरः । तत्र तस्य कुरुक्षेत्रं प्रयागं पुष्करं तथा । तस्माच्छृणुध्वं वक्ष्यामि तीर्थान्यायतनानि च । संक्षेपेण मुनिश्रेष्ठाः ! पृथिव्यां यानि कानि च । विस्तरेण न शक्यन्ते वक्तुं वर्षशतैरपि । प्रथमं पुष्करं तीर्थं नैमिषारण्यमेव च । प्रयागञ्च प्रवक्ष्यामि धर्म्मारण्यं द्विजोत्तमाः ! । धेनुका चम्पकारण्यं सैन्धवारण्यमेव च । गया प्रयागं श्रीतीर्थं दिव्यं कनखलन्तथा । भृगुतुङ्गं हिरण्याक्षं भीमारण्यं कुशस्थली । लोहार्गलं सकेदारं मन्दरारण्यमेव च । महाप्रभं कुरुक्षेत्रं सर्व्वपापहरन्तथा । रूपतीर्थं शूकरञ्च चक्रतीर्थं महाफलम् । योगतीर्थं सोमतीर्थं तीर्थं शाखोटकं तथा । तीर्थं कोकामुकं पुण्यं वदरीशैलमेव च । सोमतीर्थं तुङ्गकूटं तीर्थं स्कन्दाश्रमन्तथा । सूर्य्यप्रभं रामतीर्थं सप्तसामुद्रकं तथा । धर्म्मोद्भवं कोटितीर्थं तीर्थञ्चाघप्रणाशनम् । गङ्गाद्वारं पञ्चकूटं मध्यकेशवमेव च । चक्रप्रभं मतङ्गञ्च कुशदण्डञ्च विश्रुतम् । दंष्ट्राकुण्डं विष्णुतीर्थं सर्व्वकामिकमेव च । तीर्थं सुमलिनञ्चैव वदरीसुप्रभं तथा । ब्रह्मकुण्डं वह्निकुण्डं तीर्थं सत्यपदन्तथा । चतुःस्रोतश्चतुःशृङ्गं शैलं द्वादशवारकम् । मानसं स्थूलशृङ्गञ्च स्थूलदण्डं तथोर्वशी । लोकपाली मरुवकं सोमाद्रिशैलमेव च । सदाप्रभं मेरुकुण्डं तीर्थं सोमाभिषेचनम् । महाशोभं कोचवकं पञ्चधारं त्रिधारकम् । सप्तधारैकतीर्थञ्च तीर्थञ्चामरकण्टकम् । शालग्रामं चक्रतीर्थं कोटिद्रुममनुत्तमम् । विन्दुप्रभं देवह्रदं तीर्थं विष्णुप्रभन्तथा । शङ्खप्रभं दारुकुण्डं तीर्थं वज्रायुधं तथा । अग्निप्रभं सुपुन्नागं देवप्रभमनुत्तमम् । विद्याधरं सगन्धर्व्वं श्रीतीर्थं ब्रह्मणा कृतम् । तीर्थञ्च लोकपालाख्यं पुण्यं पिण्डारकं तथा । वस्त्रापदं दारुवनं छायारोहणमेव च । वटावटं भद्रवटं कोषाम्बी च दिवाकरा । द्वीपं सरस्वती चैव विजयं कामजन्तथा । सारवं गोप्रतारञ्च गोचरं वटमूलकम् । स्नानकुण्डं प्रयागञ्च गुह्यं विष्णुपदन्तथा । कन्याश्रमं विष्णुपदं जम्बुमार्गं तथोत्तमम् । गभस्तितीर्थञ्च तथा ययातिपतनं शुचि । कोटितीर्थं भद्रवटं महाकालवनं तथा । नर्म्मदातीर्थपरमं तीर्थं वर्षं तथार्बुदम् । पिङ्गुतीर्थं सावशिष्टं तीर्थञ्च प्रियसङ्गमम् । तीर्थं दौर्वासिकं नाम तथा पिञ्जरकं शुभम् । ऋषितीर्थं ब्रह्मकुण्डं वसुतीर्थं कुमारिका । शक्रतीर्थं शापनदं रेणुकातीर्थमेव च । पैतामहञ्च विमलं रुद्रपादं तथोत्तरम् । मणिमन्यञ्च कामाख्यं कृष्णतीर्थं कुमारिणम् । यजनं याजनञ्चैव तथैव ब्रह्मवालकम् । पुष्पाभ्यासं पुण्डरीकं मणिपूरं तथोत्तरम् । दीर्घसत्रं हंसपदं तीर्थञ्चानशनन्तथा । गङ्गोद्भेदं शिवोद्भेदं नर्म्मदोद्भेदमेव च । वज्रकोटि शङ्कुमानं तीर्थं शक्रावनामितम् । समन्तपञ्चकं तीर्थं ब्रह्मतीर्थं सुदर्शनम् । सततं पृथिवीतीर्थं पञ्चप्लव पृथूदकौ । दशाश्वमेधिकं तीर्थं सर्पिदं विषयान्तिकम् । कोटितीर्थं पञ्चनदं वाराहं यक्षिणीह्रदम् । पुण्डरीकं सोमतीर्थं मञ्जुवाटं तथोत्तमम् । वदरीवनमासीमं रत्नमूलकमेव च । लोकद्वारं पञ्चतीर्थं कपिलातीर्थमेव च । सूर्य्यतीर्थं शङ्खिनी च धराभवनमेव च । तीर्थं च यक्षराजस्य ब्रह्मावर्त्तं सुतीर्थकम् । कामेश्वरं मातृतीर्थं तीर्थं शीतवनं तथा । स्वानलोमायनञ्चैव मांसमशनकं तथा । दशाश्वमेधं केदारं ब्रह्मोडुम्बरमेव च । सप्तर्षिकुण्डञ्च तथा तीर्थं देव्याः सुजम्बुकम् । ईडास्पदं कोटिकूटं किन्नरं किंजपं तथा । कारण्डवञ्च विन्ध्यञ्च त्रिपिष्टपमथापरम् । पाणिख्यातं मिश्रकञ्च मधुवटमनोजवौ । कौशिकी देवतीर्थञ्च तीर्थञ्च ऋणमोचनम् । दिव्यञ्च तृणमूलाख्यं तीर्थं विष्णुपदन्तथा ।